# Shanaishcharastotram

# શનૈશ્ચરસ્તોત્રમ્

## Document Information

Text title : shriishanaishcharastotram

File name : shani.itx

Category : navagraha, stotra, aShTaka

Location : doc_z_misc_navagraha

Transliterated by : Michael Magee <ac70 at cityscape.co.uk>

Proofread by : Mike Magee <ac70 at cityscape.co.uk> and NA

Description-comments : shriishanaishcharastotram.h

Latest update : March 9, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# શનૈશ્ચરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

અસ્ય શ્રીશનૈશ્ચરસ્તોત્રસ્ય । દશરથ ઋષિઃ ।
શનૈશ્ચરો દેવતા । ત્રિષ્ટુપ્ છન્દઃ ॥

શનૈશ્ચરપ્રીત્યર્થ જપે વિનિયોગઃ ।
દશરથ ઉવાચ ॥

કોણોઽન્તકો રૌદ્રયમોઽથ બભ્રુઃ કૃષ્ણઃ શનિઃ પિંગલમન્દસૌરિઃ ।
નિત્યં સ્મૃતો યો હરતે ચ પીડાં તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૧॥

સુરાસુરાઃ કિંપુરુષોરગેન્દ્રા ગન્ધર્વવિદ્યાધરપન્નગાશ્ચ ।
પીડ્યન્તિ સર્વે વિષમસ્થિતેન તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૨॥

નરા નરેન્દ્રાઃ પશવો મૃગેન્દ્રા વન્યાશ્ચ યે કીટપતંગભૃઙ્ગાઃ ।
પીડ્યન્તિ સર્વે વિષમસ્થિતેન તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૩॥

દેશાશ્ચ દુર્ગાણિ વનાનિ યત્ર સેનાનિવેશાઃ પુરપત્તનાનિ ।
પીડ્યન્તિ સર્વે વિષમસ્થિતેન તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૪॥

તિલૈર્યવૈર્માષગુડાન્નદાનૈર્લોહેન નીલામ્બરદાનતો વા ।
પ્રીણાતિ મન્ત્રૈર્નિજવાસરે ચ તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૫॥

પ્રયાગકૂલે યમુનાતટે ચ સરસ્વતીપુણ્યજલે ગુહાયામ્ ।
યો યોગિનાં ધ્યાનગતોઽપિ સૂક્ષ્મસ્તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૬॥

અન્યપ્રદેશાત્સ્વગૃહં પ્રવિષ્ટસ્તદીયવારે સ નરઃ સુખી સ્યાત્ ।
ગૃહાદ્ ગતો યો ન પુનઃ પ્રયાતિ તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૭॥

સ્રષ્ટા સ્વયંભૂર્ભુવનત્રયસ્ય ત્રાતા હરીશો હરતે પિનાકી ।
એકસ્ત્રિધા ઋગ્યજુઃસામમૂર્તિસ્તસ્મૈ નમઃ શ્રીરવિનન્દનાય ॥ ૮॥

શન્યષ્ટકં યઃ પ્રયતઃ પ્રભાતે નિત્યં સુપુત્રૈઃ પશુબાન્ધવૈશ્ચ ।

પઠેત્તુ સૌખ્યં ભુવિ ભોગયુક્તઃ પ્રાપ્નોતિ નિર્વાણપદં તદન્તે ॥ ૯॥

કોણસ્થઃ પિઙ્ગલો બભ્રુઃ કૃષ્ણો રૌદ્રોઽન્તકો યમઃ ।
સૌરિઃ શનૈશ્ચરો મન્દઃ પિપ્પલાદેન સંસ્તુતઃ ॥ ૧૦॥

એતાનિ દશ નામાનિ પ્રાતરુત્થાય યઃ પઠેત્ ।
શનૈશ્ચરકૃતા પીડા ન કદાચિદ્ભવિષ્યતિ ॥ ૧૧॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે શ્રીશનૈશ્ચરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Mike Magee ac70 at cityscape.co.uk

*Shanaishcharastotram*

pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*